॥ श्रीः ॥

## ॥ श्रीवाणीपाण्यवलम्बस्तुतिः ॥

जाड्यवारिधिनिमग्नसुबुद्धे-
जर्जातरूपसदृशच्छविकाये ।
वासवादि दिविषत्प्रवरेड्ये
वाणि देहि मम पाण्यवलम्बम् ॥ १

पाणि निर्जितसरोरुहगर्वे
पारदे विविधदुःखपयोधेः ।
वासनाविरहितैर्लघुलभ्ये
वाणि देहि मम पाण्यवलम्बम् ॥ २

शृङ्गशैलशिखरादृतवासे-
ऽनङ्गगर्वहरशम्भुसगर्भ्ये ।
तुङ्गमङ्गलनिदानकटाक्षे
वाणि देहि मम पाण्यवलम्बम् ॥ ३

शारदाभ्रसदृशाम्बरवीते
नारदादिमुनिचिन्तितपादे ।
नीलनीरदसदृक्कचभारे
वाणि देहि मम पाण्यवलम्बम् ॥ ४

यत्पदाम्बुरुहपूजकवक्त्रा-
दाशु निःसरति वागनवद्या ।
स्वर्धुनी हिमगिरेरिव सा त्वं
वाणि देहि मम पाण्यवलम्बम् ॥ ५

जातुचित्प्रणमतोऽपि पदाब्जे
देवराजसदृशान् प्रकरोषि ।
यत्तदम्ब चरणौ तव वन्दे
वाणि देहि मम पाण्यवलम्बम् ॥ ६

शान्तिदान्तिमुखसाधनयुक्तै-
र्वेदशीर्षपरिशीलनसक्तैः ।
आदरादहरहः परिसेव्ये
वाणि देहि मम पाण्यवलम्बम् ॥ ७

कोशपञ्चकनिषेधनपूर्वं
क्लेशपञ्चकमपि प्रविहाय ।
यां प्रपश्यति यतिर्हृदि सा त्वं
वाणि देहि मम पाण्यवलम्बम् ॥ ८

वन्द्यमानचरणे सुरबृन्दै-
र्गीयमानचरिते तुरगास्यैः ।
जप्यमाननिजनाम्नि मुनीन्द्रै-
र्वाणि देहि मम पाण्यवलम्बम् ॥ ९

सन्निरीक्ष्य कमलानि यदङ्घ्री
साम्यमाप्तुमनयोस्तपसाम्भः ।
कण्ठदघ्नमधिजग्मुरसौ सा
वाणि देहि मम पाण्यवलम्बम् ॥ १०

पुण्यमम्ब न कृतं मतिपूर्वं
पापमेव रचितं त्वतियत्नात् ।
तेन तप्तमनिशं हृदयाब्जं
वाणि देहि मम पाण्यवलम्बम् ॥ ११

नाहमम्ब सरसां च सुवर्णा-
मातनोमि कवितां विविधार्थाम् ।
केन पूजयति मां भुवि लोको
वाणि देहि मम पाण्यवलम्बम् ॥ १२

अक्षपादकणभुक्फणिनाथै-
र्देवहूतिसुतजैमिनिमुख्यैः ।
प्रोक्तशास्त्रनिचये न बुद्धि-
र्वाणि देहि मम पाण्यवलम्बम् ॥ १३

नैव पादसरसीरुहयोस्ते
पूजनं प्रतिदिनं प्रकरोमि ।
हेतुशून्यकरुणाजनिभूमे
वाणि देहि मम पाण्यवलम्बम् ॥ १४

सन्निरुध्य हृदयाम्बुजमध्ये
स्वान्तमम्ब तव सुन्दरमूर्तेः ।
ध्यानमप्यनुदिनं न हि कुर्वे
वाणि देहि मम पाण्यवलम्बम् ॥ १५

दुःखजन्मवसुधा विषया इ-
त्यादरेण गुरुभिः श्रुतिशीर्षैः ।
बोधितोऽपि न हि यामि विरक्तिं
वाणि देहि मम पाण्यवलम्बम् ॥ १६

पुत्रमित्रगृहदारजनन्यो
भ्रातृबन्धुधनभृत्यमुखा वा ।
नैव कालवशगस्य सहाया
वाणि देहि मम पाण्यवलम्बम् ॥ १७

एकमेव सदबाधितमन्य-
त्तुच्छमित्यसकृदागमशीर्षम् ।
वक्त्यथापि न निवृत्तिरनित्या-
द्वाणि देहि मम पाण्यवलम्बम् ॥ १८

जन्ममृत्युमयनीरधिमध्ये
मज्जतो विविधरुङ्मकराढ्ये ।
पश्यतोऽपि न हि भीतिरनेका
न्वाणि देहि मम पाण्यवलम्बम् ॥ १९

त्वत्पदाम्बुरुहयुग्ममपास्य
प्राक्तनाघपरिमार्जनदक्षम् ।
नास्ति तारणविधानसमर्थं
वाणि देहि मम पाण्यवलम्बम् ॥ २०

बालचन्द्रपरिचुम्बितशीर्षे
बाहुसक्तकनकाङ्गदरम्ये ।
कण्ठलोलवरमौक्तिकहारे
वाणि देहि मम पाण्यवलम्बम् ॥ २१

आननेन चरणेन कटाक्षै-
र्नीरजासनमनोहरकान्ते ।
चन्द्रमम्बुजमलिं च हसन्ति
वाणि देहि मम पाण्यवलम्बम् ॥ २२

मध्यनिर्जितमृगाधिपगर्वे
मत्तवारणसदृग्गतिशीले ।
मञ्जुशिञ्जितमहाभरणाढ्ये
वाणि देहि मम पाण्यवलम्बम् ॥ २३

तापमम्बविनिवार्य समस्तं
पापमप्यहरहःकृतमाशु ।
चित्तशुद्धिमचिरात्कुरु मात-
र्वाणि देहि मम पाण्यवलम्बम् ॥ २४

पादपद्मयुगमर्दनरूपा
पात्रवस्त्रपरिशुद्धिमुखा वा ।
श्रीगुरोर्न हि कृता बत सेवा
वाणि देहि मम पाण्यवलम्बम् ॥ २५

मन्त्रराजलयपूर्वकयोगान्
योगिनीहृदयमुख्यसुतन्त्रान् ।
नैव वेद्मि करुणामृतराशे
वाणि देहि मम पाण्यवलम्बम् ॥ २६

कामलोभमदपूरितचेतः-
प्राणिदूरनिजपादपयोजे ।
कामनिर्मथनदक्षसगर्भ्ये
वाणि देहि मम पाण्यवलम्बम् ॥ २७

अङ्गयष्टिरुचिनिर्जितभर्मे
कुम्भिकुम्भपरिपन्थिकुचाढ्ये ।
भृङ्गनीलचिकुरे तनुमध्ये
वाणि देहि मम पाण्यवलम्बम् ॥ २८

स्वाङ्घ्रिसेवनसमागतकाष्ठा-
कान्तदारकरमर्दितपादे ।
स्वामिनि त्रिजगतां धृतवीणे
वाणि देहि मम पाण्यवलम्बम् ॥ २९

नीलनागनिवहा विविशुर्य-
द्वेणिकां मुहुरवेक्ष्य बिलानि ।
लज्जयाशु विधिभामिनि सा त्वं
वाणि देहि मम पाण्यवलम्बम् ॥ ३०

शान्तिदान्तिविरतिप्रमुखा मां
मोहकोपमुखरोगविशीर्णम् ।
वीक्ष्य यान्ति तरसा बहुदूरं
वाणि देहि मम पाण्यवलम्बम् ॥ ३१

काकलोकसदृशः पिकलोकः
केकिजालमपि शोकिनितान्तम् ।
यद्वचः श्रवणतः खलु सा त्वं
वाणि देहि मम पाण्यवलम्बम् ॥ ३२

राजराजपदवीं क्षणमात्रा-
द्याति यत्पदसरोरुहनत्या ।
दीनराडपि जनो भुवि सा त्वं
वाणि देहि मम पाण्यवलम्बम् ॥ ३३

शीघ्रकाव्यकरणेऽम्ब पटुत्वं
यान्ति मूकबधिरादिममर्त्याः ।
यत्पदप्रणतितो भुवि सा त्वं
वाणि देहि मम पाण्यवलम्बम् ॥ ३४

ब्राह्मि भारति सरस्वति भाषे
वाक्सवित्रि कमलोद्भवजाये ।
पाणिपङ्कजलसद्वरवीणे
वाणि देहि मम पाण्यवलम्बम् ॥ ३५

चामरप्रविलसत्करगौरी-
विष्णुदारपरिसेवितपार्श्वे ।
चामराजसुतपालनसक्ते
वाणि देहि मम पाण्यवलम्बम् ॥ ३६

शेषशैलपतिनामकमन्त्रि-
श्रेष्ठपालनपरायणचित्ते ।
शेवधेऽब्जभवपूर्ववृषाणां
वाणि देहि मम पाण्यवलम्बम् ॥ ३७

श्रीनृसिंहशिशुरामयुतश्री-
कण्ठपालननिषक्तमनस्के ।
श्रीशशङ्करमुखामरपूज्ये
वाणि देहि मम पाण्यवलम्बम् ॥ ३८

इति श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीमहास्वामिविरचितं
श्रीवाणीपाण्यवलम्बस्तुतिः सम्पूर्णा ॥

